Vol. XI No. 2

# BULLETIN OF THE GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY MADRAS

EDITED BY

T. CHANDRASEKHARAN, M.A., L.T.,

*Curator, Government Oriental Manuscripts Library, Madras.*

1959

*Price, Rs. 2.*

## RARE BOOKS FOR SALE.

The following publications of the Government Oriental Manuscripts Library, Triplicane, Madras-5, will be sold for the amount noted against each which is only ***half the original price***:—

| | Rs. | A. | P. |
|---|---|---|---|
| 1. Brahmasiddhi of Maṇḍanamis'ra with the commentary of S'aṅkhapāṇi—an advanced work on Advaita Philcsophy ... ... | 3 | 14 | 0 |
| 2. Rāmānujacampū with commentary ... | 1 | 8 | 0 |
| 3. Vyākaraṇa Mahābhāṣya of Patañjali with the commentary of Kaiyaṭa and the super-commentary of Annambhaṭṭa, Volume I ... ... | 10 | 6 | 0 |
| Do. do. Volume II ... ... | 4 | 8 | 0 |
| 4. Back volumes of the Multilingual Half-Yearly Bulletin containing in print rare manuscripts in Sanskrit, Marathi, Islamic and other South Indian Languages (each volume) ... | 2 | 0 | 0 |
| 5. The Descriptive and Triennial Catalogues of the Manuscripts in the Library published on or before 1950 are also available for sale at half rate. | | | |

Sales tax, packing and postage extra. The amount should be sent ***in advance.***

Please apply to the Curator.

Vol. XI No. 2

# BULLETIN OF THE GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY MADRAS

EDITED BY

T. CHANDRASEKHARAN, M.A., L.T.,
*Curator, Government Oriental Manuscripts Library, Madras.*

1959

Printed at
RATHNAM PRESS
MADRAS-1

# TABLE OF CONTENTS


| | | PAGE |
|---|---|---|
| Chandaḥkaustubha, with Commentary (Sanskrit)<br>Edited by Sri T. Chandrasekharan, M.A., L.T., and<br>Sri T. A. K. Venkatachariar | ... | 1 |
| Nammāḻvār Ūñcaṟ Kavitai (Tamil)<br>Edited by Vidvān, V. S. Krishnan | ... | 65 |
| Māṇikka-p-pavaḻəkkōvai (Tamil)<br>Edited by Pulavar, M. Pasupathi | ... | 75 |
| Vis′vēs′vara S′atakamu (Telugu)<br>Edited by Sri M. Sarabhesvara Sarma | ... | 81 |
| Svarūpāmṛta (Kannada)<br>Edited by Sri M. Shankaranarayana Bhat | ... | 99 |
| S′aṁbaraṿadham (Malayālam)<br>Edited by Sri M. N. Ramakrishnan Nair, M A. | ... | 121 |
| Poonapet Kaifiat (Marāṭhi)<br>Edited by Sri K. Thulajaraṃ Ksheerasagar | ... | 131 |
| Risalah-i-Faramin-o-Araidh (Persian)<br>Edited by Syed Hamza Hussain, Omari Munshi-i-Fazil | | 139 |

# CHANDAḤKAUSTUBHA

*Edited by*

T. CHANDRASEKHARAN, M.A., L.T.,

AND

T. A. K. VENKATACHARIAR.

Chandaḥkaustubha is an exposition of the metres that are found in Vedic and Classicial Sanskrit. Though prosody is dealt with by some ancient scholars like Piṅgalanāga, the various metres have been described in this work in an elaborate manner. The *mātrā-vṛttas* viz., the metres based on *mātrās* are described only after the description of the metres based on letters or syllables unlike the usual practice in the reverse order.

The total number of metres dealt with herein is 267 out of which 41 are based on *mātrās*. Since this work is dedicated to Lord Viṣṇu, this is called *Kaustubha* which is supposed to be the main ornament of Lord Viṣṇu and the chapters herein are correspondingly styled as *prabhās*. This consists of 9 chapters.

The author of this work is one Rādhādāmodara, a disciple of Nayanānandadeva. It is understood from the commentary of this work that this author is a Brahmin from Kānyakubja and a follower of Vallabha cult.

The commentator is one Vidyābhūṣaṇa who was a native of Bengal. He was a disciple of the author of the text, and like him, was a follower of Vallabha doctrine.

From the style of this work it may be inferred that the authors of the text and the commentary belong to the beginning of the 18th Century. Further details about the commentator can be had from the introduction to the Sāhityakaumudī published in the Kāvyamālā Series.

The edition of this work is based on a single manuscript preserved in the Government Oriental Manuscripts Library, Madras, bearing R. No. 4509 - Paper - Devanāgarī, size $12\frac{1}{2} \times 6\frac{3}{4}$ inches, Lines 14 in a page. Foll. 28 - complete; purchased in 1924-25 from one Sri G. K. Svami Ayyangar, Annavasal Street, Rajamannargudi, Tanjore District.

# ॥ छन्दःकौस्तुभः ॥

## ॥ श्रीविद्याभूषणविरचितभाष्यसहितः ॥

(मू)  छन्दोभिर्विततााङ्गैः कवयो यस्यानुकीर्तयन्ति गुणान् ।
स जयति गोकुलवनिताजितान्तरः श्यामसुन्दरो भगवान् ॥ १ ॥

(व्या)  अर्चितनयनानन्दो राधादामोदरो गुरुर्जीयात् ।
विवृणोमि यस्य कृपया छन्दःकौस्तुभमहं मितवाक् ॥

अथ श्रीनयनानन्दपदारविन्दसेवासान्द्रितनिखिलशास्त्रार्थः छन्दो(विवृदवद्यः) **[ विद्वद्वंद्यः ]** श्रीराधादामोदराभिधः कान्यकुब्जविप्रवंशावतंसो महत्तमः कविः छन्दःकौस्तुभं नाम छन्दश्शास्त्रं प्रणयन् सर्वच्छन्दःप्रगेयचरितं श्रीकृष्णं प्रणमति **छन्दोभिरिति । स श्यामसुन्दरो जयति** स्वोत्कर्षमाविर्भावयि(तुं)[यति] जयहेतुः, भगवानिति ।

> ' ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
> ज्ञानवैराग्ययोश्चापि षण्णां भग इतीरणा ॥ '

इत्युक्तषड्भगविशिष्टः ईदृशोऽपि भक्तिवश्य इत्याह **गोकुलेति ।** अंतरं चित्तं कोऽसावित्याह—**छन्दोभिरिति ।** कवयो यस्य गुणान् विततााङ्गैश्छन्दोभिरनुकीर्तयन्तीति । गोकुलवनिताभिर्विहरतस्तत्प्रेमवश्यस्य तस्य लीलां गातुं छन्दांसि फणीन्द्रेण प्रणीतानि । एवमेव वक्ष्यति "लीलां विष्णो"रिति । छन्द्यन्ते ग्रथ्यन्ते पद्यान्येभिरिति छन्दांसि तैरित्यर्थः । विततााङ्गैरिति । प्रस्तुताया जातेरेकस्याः भेदबाहुल्यात् । जयतिरत्र सर्वोत्कर्षाभिधायी । सर्वोत्कर्षाश्रयः खलु स्वेतरसर्वैर्नमस्य इत्याक्षिप्यते । सर्वान्तःपातित्वाच्छास्त्रकर्तुश्च स नमस्य इति सर्वनमस्याद्भगवतस्तस्मादस्माकं सर्वेषां मङ्गलं भूयादिति च व्यज्यते । श्यामसुन्दरो भगवानिति वस्तुस्वरूपकीर्तनम् । इत्थं च ' आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् ' इत्यभियुक्तोक्तं ग्रन्थारम्भे मङ्गलं दर्शितम् । न च मङ्गलमप्रमाणमफलं चेति वाच्यम् ।

शिष्टाचारानुमितायाः श्रुतेः प्रमाणत्वात्, शास्त्रपूर्तेः फलत्वाच्च। ननु क्वचित् सत्यपि मङ्गलेऽसमाप्तिः, असति च तस्मिन् समाप्तिर्दृष्टा ततो व्यभिचार इति चेन्मैवम्। योग्यमङ्गलाकरणात् बहिस्तत्करणाच्चेत्यावश्यकं तत् ॥ १ ॥

नित्यं निवसतु हृदये चैतन्यात्मा मुरारिर्नः।
निरवद्यो निर्वृतिमान् गजपतिरनुकम्पया यस्य ॥ २ ॥

विघ्नाधिक्यशङ्कया पुनर्मङ्गलाचरणं **नित्यमिति**। अत्र मुरारिश्चैतन्यात्मा चेत्येतौ द्वावर्थौ प्रतिपाद्येते। तत्राद्यो ग्रन्थकर्तुः परमगुरुः श्रीरसिकानन्दापराख्यः। स कीदृश इत्याह—**चैतन्यात्मेति**। चैतन्यार्पितचित्त इत्यर्थः। गजपतिः गोपालदासाभिधः काणिजः। निरवद्यः त्यक्तपशुभावः। निर्वृतिमान् सेवाजन्यानन्दविशिष्टः यस्यानुकम्पया बभूवेति शेषः। द्वितीयः श्रीमहाप्रभुः चैतन्यनामा आत्मा विग्रहः। स कीदृश इत्याह—मुरारिरिति। संसृतिकुत्सानाशक इत्यर्थः। गजपतिः प्रतापरुद्रः उत्कलाधीशः। निरवद्यः परित्यक्तराजसः। निर्वृतिमान् प्रेमसुखमग्नः। अत्र प्रथमोऽर्थो वाच्यः। द्वितीयस्तु व्यङ्ग्यः। भगवत्पक्षेऽपि पद्यमेतत्सुघटम् ॥ २ ॥

अथ च्छन्दोदेशिकात्पिङ्गलात् स्वरक्षामाशास्ते—

लीलां विष्णोर्गातुकामोऽतिचित्रां
छन्दांस्याख्यद्योऽभिरूपाह्वयानि।
श्रीमान् विद्यावारिधिर्विश्ववन्द्यः
पायात्सोऽस्मान् पिङ्गलो नागराजः ॥ ३ ॥

**लीलामिति**। श्रीमान् नागराजः पिङ्गलः शेषोऽस्मान् पायात्। विघ्नाद्रक्षतु। स क इत्याह—योऽतिचित्रां विष्णोर्लीलां गातुकामः सन्नभिरूपाह्वयानि छन्दांस्याख्यदवोचत्। स भगवच्चरित्रगायकः खलु शेषः।

'गायन् गृणन् दशशतानन आदिदेवः शेषोऽधुनापि समवस्यति नास्य पारम्'

इत्याद्युक्तेः। छन्दोनिबन्धमन्तरा तद्भावासिद्धेः। अत एव तच्छीलानुरूपाह्वयानि तानि कृतानि। स्फुटमन्यत् ॥ ३ ॥

छन्दोबोधं विना विद्वान् सभायामुपहासपात्रं भवत्यतस्तद्बोध आवश्यक इत्याह—

छन्दोलक्षणहीनं सभासु काव्यं पठन्ति ये मनुजाः ।
कुर्वन्तोऽपि स्वेन स्वशिरश्छेदं न ते विद्युः ॥ ४ ॥

**छन्दोलक्षणेति** । स्वेन आत्मना स्वहस्तेनेति यावत् ॥ ४ ॥

वर्णमात्राविभेदेन छन्दो द्विविधमीरितम् ।
लक्ष्यलक्षणरूपं तत् प्रायः संगृह्यते मया ॥ ५ ॥

**वर्णमात्रेति** । वर्णवृत्तं मात्रावृत्तं चेति द्विविधं छन्दः । तदत्र मया संगृह्यत इति । प्राचीनानि सूत्राण्यत्र प्रायः सन्तीत्युक्तम् । कीदृशं छन्द इत्याह— **लक्ष्यलक्षणरूपमिति** । लक्ष्यं छन्दः लक्षणं तद्गणादिनिरूपणं तदुभयरूपमितिलक्षण-मात्रकारिभ्यः प्राचीनेभ्योऽस्य ग्रन्थकर्तुरतिपाण्डित्यम् । **प्राय** इत्या(पी)[दि । इ] डादिच्छन्दसां लक्ष्यनिरपेक्ष[लक्ष]णमात्रविधानात् । यद्यपि मात्रावृत्तानि कैश्चित्पूर्वमभि-हितानि, तथापि वर्णवृत्तान्यत्र प्रागेवोच्यन्ते । ऋजुरीत्या चित्तप्रवेशहेतुत्वादिति बोध्यम् ॥ ५ ॥

(वि) [द्वि]भेदं छन्दः प्रतिज्ञायाथ क्रमप्राप्तान् वर्णच्छन्दसि गणान् गण-देवताफलानि चाह **मयरसेति** द्वाभ्याम् ।

मयरसतजभनसंज्ञाश्छन्दस्यष्टौ गणास्त्रिवर्णाः स्युः ।
भूम्यम्बुवह्निवायुव्योमार्कसुधांशुनाकदेवास्ते ॥ ६ ॥

क्रमतः श्रीवृद्धिमृतिप्रयाणरिक्तत्वरुग्यशोमोदान् ।
यच्छन्ति फलानि गणा माद्यास्तेऽष्टौ प्रयोक्तृभ्यः ॥ ७ ॥

छन्दसि शास्त्रेऽष्टौ गणा भवन्ति । ते च त्रिवर्णाः वर्णत्रयरूपाः स्युः । ते किंनामानो भवन्तीत्याह—**मयेति** । मादयः संज्ञा गुरुत्रयादिरूपास्त्वष्टौ त्रिकाः संज्ञिनः । ते, चाष्टौ क्रमाद्भूम्यादिदेवताकाः क्रमात् श्र्यादीन्यष्ट फलानि प्रयोक्तृभ्यः प्रयच्छन्ति । प्रयोक्तारः काव्यस्य कर्तारः कवयो वा, कारयितारश्च नृपा [वा] इत्यवधेयम् । यथासंख्यमलङ्कारः ।

यदुक्तं
"यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः"
इति। गणदेवताफलानां त्वेष ऋजुबोधः। यथा—

मो भूः श्रियं यच्छति योऽम्बु वृद्धिं
रोऽग्निर्मृतं सो मरुदुत्प्रयाणम्।
तो व्योम रिक्तिं ज रविः प्ररोगं
भेन्दुर्यशः सौख्यभरं न नाकः॥ इति ॥ ६, ७ ॥

गणानां संज्ञां दर्शयित्वाथ संज्ञिनो दर्शयति—

सर्वगुरुर्मः कथितो भजसा गुर्वादिमध्यान्ताः।
छन्दसि नः सर्वलघुर्यरता लघ्वादिमध्यान्ताः॥ ८ ॥

**सर्वगुरुर्म** इति। त्रिवर्णा इत्युक्तेः सर्वे त्रयोऽपि गुरवो यस्य स मगणः। भजसा इति। गुर्वादिर्भगणो, गुरुमध्यः जगणः, गुर्वन्तः सगण इत्यर्थः। छन्दसि वर्णवृत्ते सर्वे त्रयोऽपि लघवो यस्मिन् स नगणः। यरता इति। लघ्वादिर्यगणः। लघुमध्यो रगणः। लघ्वन्तस्तगण इत्यर्थः॥ ८ ॥

गुर्गश्च गुरुरेकः स्याल्लस्त्वेको लघुरुच्यते।
रेखाभ्यामृजुवक्राभ्यां ज्ञेयौ लघुगुरू क्रमात्॥ ९ ॥

| मः | यः | रः | सः | तः | जः | भः | नः | लः | गः |
|---|---|---|---|---|---|---|---|---|---|
| ऽऽऽ | ।ऽऽ | ऽ।ऽ | ।।ऽ | ऽऽ। | ।ऽ। | ऽ।। | ।।। | । | ऽ |

**गुरिति**। एकस्मिन् लघौ लकारः सङ्केतितो, गुकारो गकारश्चैकस्मिन् गुरावित्यर्थः। ननु लघुगुर्वोः कथं परिचयः स्यादित्यत आह—**रेखाभ्या**मिति। ऋजुरेखया लघुर्ज्ञेयः, वक्ररेखया तु गुरुर्ज्ञेय इत्यर्थः॥ ९ ॥

अथ मादिगणानां मित्रादिभावमाह—

मनौ सखायौ कथितौ भयौ भृत्यावुदीरितौ।
उदासीनौ तजौ प्रोक्तौ सरौ शत्रू मताविह॥ १० ॥

**मनाविति** । स्फुटम् ॥ १० ॥

मित्रादिरूपाणां मादीनां श्लोकादौ विन्यस्तानां फलान्याह—**सिद्धिरिति चतुर्भिः** ।

सिद्धिर्भवेत्सखिभ्यां सखिभृत्याभ्यां जयः स्थिरत्वं च ।
स्याद्भृत्यमित्रभृत्यैः शुभं पीडा तु मित्रशत्रुभ्याम् ॥ ११ ॥

[1]सखिभ्यां मनाभ्यां सखिभृत्याभ्यां मभाभ्यां नयाभ्यां वा भृत्यमित्र-भृत्यैर्भमयैः यनभैर्वा ॥ ११ ॥

अफलमुदासीनाभ्यांशत्रुसखिभ्यां तत्तद्भवति ।
शत्रुभ्यां नु विरोधो नायकनाशश्च स प्रोक्तः ॥ १२ ॥

[2]उदासीनाभ्यां तजाभ्यां शत्रुसखिभ्यां समाभ्यां [ रनाभ्यां ] वा शत्रुभ्यां सराभ्याम् ॥ १२ ॥

शत्रूदासीनाभ्यां हानिरुदासीनभृत्याभ्याम् ।
अस्वायतिर्गदिता श्रीनाशः शत्रुभृत्याभ्याम् ॥ १३ ॥

शत्रूदासीनाभ्यां सताभ्यां रजाभ्यां वा हानिर्द्रविणनाशः । उदासीन-भृत्याभ्यां तभाभ्यां जयाभ्यां वा अस्वायतिः पारतन्त्र्यम् । श्रीनाशः शोभाक्षय शत्रुभृत्याभ्यां सभाभ्यां रयाभ्यां च ॥ १३ ॥

क्षयवैरिभयप्राप्तिर्भवत्युदासीनशत्रुभ्याम् ।
मित्रोदासीनाभ्यामश्रीरिति गणफलान्याहुः ॥ १४ ॥

---

1. अत्रेदमावश्यकमिति भाति, उत्तरत्र तथाव्याख्यानात् , सखिभ्यां मनाभ्यां इष्टसिद्धिः, सखिभृत्याभ्यां मभाभ्यां नयाभ्यां युद्धादिषु स्वस्योत्कर्षप्राप्तिः, शत्रोः पराजयोऽवमानप्राप्तिः, स्थिरत्वं लब्धस्थैर्यसिद्धिः, भृत्यमित्रभृत्यैः भमयैः यनभैः शुभं मङ्गलं सौख्यप्राप्तिः मित्रशत्रुभ्यां मसाभ्यां नराभ्यां पीडा आधिभौतिकाधिदैविकाध्यात्मिकाद्युपद्रवः ।

2. उदासीनाभ्यां अफलं अभिमतफलाभावः, शत्रुसखिभ्यां तत्तत् तत्कालसमुचित-मनिष्टेष्टाद्यागमनं, शत्रुभ्यां विरोधोऽत्यन्तस्निग्धानामप्यपरिहरः कलहः, नायकनाशश्च हानिश्च भवेदित्यर्थः ।

क्षयश्च कुटुम्बनाशः वैरिभयं च तयोः प्राप्तिर्भवति । उदासीनशत्रुभ्यां तसाभ्यां जराभ्यां च मित्रोदासीनाभ्यां मताभ्यां नजाभ्यां च अश्रीः दारिद्यम् ॥ १४ ॥

अथ दग्धाक्षराणि, तत्फलानि चाह **हजभ्रेति** सार्धेन—

हजभ्रग्रखभान् प्राहुर्दग्धवर्णान् विपश्चितः ।

हजधाहिजीवनधनहरा नृपक्रोधकृद्रेफः ।
तनुपीडारुग्व्रणदाघनखाभरहातिदूरगतिदायी(?) ॥ १५ ॥

हजभ्र इत्यादौ क्रमो बोध्यः । (मु)[भ]कारो देशाद्विवासयतीत्यर्थः ॥ १५ ॥
दुष्टगणानां दुष्टवर्णानां च ज्ञापने फलमाह—

गणा दुष्टफला राद्या दग्धवर्णाश्च हादयः ।
शुभश्लोकमुखे नैते प्रयोक्तव्याः शुभार्थिभिः ॥ १६ ॥

**गणा** इति । स्पष्टम् ॥ १६ ॥

अत्रापवाद :—

देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ।
ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥ १७ ॥

इह भामहवचनेन बाधमाह—**देवतेति** । श्रीकृष्णशंकरादयो देवताः । भद्रं मङ्गलम् । लिपिर्वर्णः ॥ १७ ॥

एवं वर्णवृत्तगणादीनुक्त्वा मात्रावृत्तगणानाह—

ज्ञेयास्सर्वादिमध्यान्तगुरवोऽत्र चतुष्कलाः ।
गणाश्चतुर्लघूपेताः पञ्चार्यादिषु संस्थिताः ॥ १८ ॥

**ज्ञेया** इति । आर्यादिषु मात्रावृत्तेषु संस्थिताः पञ्च गणा ज्ञेया इत्यन्वयः । तेषां स्वरूपमाह **चतुष्कला** इति । पञ्चापि ते चतुर्मात्रात्मका इत्यर्थः । तेषां मिथो व्यावर्तकान् धर्मान् दर्शयन् विशिनष्टि सर्वादिमध्यान्तगुरवश्चतुर्लघूपेताश्चेति ।

सर्वत्र आदौ मध्येऽन्ते च गुरुर्येषां ते तथा। चतुर्लघुना सर्वलघुना गणेन युक्ताश्चेत्यर्थः। सर्वगुरुरादिगुरुर्मध्यगुरुरन्तगुरुश्चतुर्लघुश्चेति मिथो भिन्नाः पञ्च गणाः ॥ १८ ॥

अथ गुरुलक्षणमाह—

अनुस्वारी विसर्गी च दीर्घो युक्तपरस्तथा।
वर्णो गुरुर्मतो ह्रे प्रे पादान्ते चापि वा लघुः ॥ १९ ॥

**अनुस्वारीति**। अनुस्वारी [विसर्गी ह्रस्वो वर्णः, दीर्घः, युक्तपरः संयुक्त] प्रमुखो [ह्रस्वश्च] वर्णो गुरुर्मतः। हरिं पुनः साक्षात्करिष्यसीति चतुर्णामुदाहरणम्। ह्रे प्रे च परे पूर्वस्य ह्रस्वस्य वा लघुत्वम्। तच्च वैवक्षिकं बोध्यम्। पादान्ते गुरुरपि लघुर्लघुश्च गुरुर्विवक्षया भवेत्। वैवक्षिकयोर्गुरुलघ्वोः प्रस्तारे तु वक्रर्जू रेखे लेख्ये। किञ्चित्ती [ञ्च ती] व्रप्रयत्नोच्चारणे गुरोर्लघुत्वमाह कण्ठाभरणः[1]।

"यदा तीव्रप्रयत्नेन संयोगादेरगौरवम्।
न च्छन्दोभङ्गमप्याहुस्तदा दोषाय सूरयः" ॥ इति ॥ १९ ॥

पादलक्षणमाह—

चतुर्थः पद्यभागस्तु पादः सद्भिर्निगद्यते ॥ २० ॥

**चतुर्थ** इति। श्लोकचतुर्थांशः पाद इत्यर्थः। अत्र भागः समचतुर्थांशो न ग्राह्यः। किन्तु यावान् यत्रोच्यते [तावान् ग्राह्यः]। तेन समार्धसमविषमानां पादाः संगृहीताः स्युः ॥ २० ॥

यतिं लक्षयति—

यतिं जिह्वोष्ठविश्रामस्थानमाहुर्मनीषिणः।
सा विच्छेदविरामाद्यैः पदैरत्र विराजते ॥ २१ ॥

---

1. सरस्वतीकण्ठाभरणम्।

**यति**रिति। आदिना रवादिपरिग्रहः। अत्र गोपालदासो विशेषमाह यथा—

'क्वचिच्छन्दस्यास्ते (यमिरिति) [यतिरभि]हिता पूर्वकृतिभिः
पदान्ते सा शोभां व्रजति यदि मध्ये त्यजति च।
पुनस्तत्रैवासौ स्वरविहितसन्धिः श्रयति तां
यथा कृष्ण४ पुष्णात्वतुलमहिमा मां करुणया॥' इति।

श्वेतमाण्डव्यादयस्तु यतिं न मन्यन्ते। यदुक्तं—[छन्दोगोविन्दे]

'श्वेतमाण्डव्यमुख्यास्तु नेच्छन्ति मुनयो यतिम्' इति॥ २१॥

अयुग्मं विषमं स्थानमयुगोजश्च तद्भवेत्।
अनोजो युक् च युग्मं च समं तत्परिकीर्तितम्॥ २२॥

**अयुग्म**मिति। प्रथमतृतीयादिरूपस्य विषमस्थानस्य अयुग्मं अयुक् ओजश्चेति संज्ञात्रयम्। द्वितीयचतुर्थादिरूपस्य समस्थानस्य तु युग्मं युक् अनोजश्चेति संज्ञात्रयं बोध्यम्। एतच्चार्धसमादिषु वृत्तेषु व्यक्तीभविष्यति॥ २२॥

सममर्धसमं वृत्तं विषमं चेति तत् त्रिधा।
समं समचतुष्पादं वृत्तमर्धसमं तु तत्॥ २३॥

आद्यस्तृतीयवद्यस्य द्वितीयस्तुर्यवद्भवेत्।
भिन्नचिह्नचतुष्पादं विषमं परिकीर्तितम्॥ २४॥

**सम**मिति। वृत्तं त्रिविधं सममर्धसमं विषमं चेति। तेषु समचतुष्पादं वृत्तं सममुच्यते। समा एकलक्षणाश्चत्वारः पादा यस्य तत्। अर्धसमं तु तत्। यस्य वृत्तस्य प्रथमः पादस्तृतीयतुल्यः, द्वितीयश्चतुर्थतुल्यो भवति। विषमं वृत्तं भिन्नचिह्न-चतुष्पादं, भिन्नचिह्नाश्चत्वारः पादा यस्य तत्। वर्तते कविरनेन पद्यनिर्मिताविति वृत्तम्॥ २३, २४॥

संज्ञा शरहयाद्या तु लोकतोऽध्यवसीयते॥ २५॥

**संज्ञे**ति। शराद्या संज्ञा लोकतो ज्योतिःशास्त्रादिव बोध्या।

'खं शून्यं विधुरेकः स्यान्नेत्रपक्षौ द्विके स्मृतौ।
त्रिके शिवगुणा वेदाब्धियुगानि चतुष्टये॥

शरा भूतानि करणानि च प्रोक्तानि पञ्चके ।
ऋतवो गुहवक्त्राणि रसाश्च षडुदीरिताः ।
स्वराश्च मनुलोकाश्च सप्तेह परिकीर्तिताः ॥

भोग्यंगवसवोऽष्ट स्युर्नव रंध्रग्रहाः स्मृताः ।
दिशो दशैकादश स्युः शिवा द्वादशसूर्यकाः ॥
चतुर्दशात्र भुवनान्येवमाहुर्मनीषिणः ॥" इति ॥ २५ ॥

आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्धितैः ।
पादैरुक्थादिसंज्ञं स्याच्छन्दः षड्विंशतिं गतम् ॥ २६ ॥

**आरभ्येति ।** वर्णच्छन्दांस्येकाक्षरपादादीनि षड्विंशत्यक्षरपादान्तानि भवन्ति । तानि च क्रमादुक्थादिजातिमन्ति बोध्यानि ॥ २६ ॥

अथ तज्जातीराह—**उक्थेति[1] त्रिभिः ।**

उक्थात्युक्था तथा मध्या प्रतिष्ठा सुप्रतिष्ठिका ।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ॥ २७ ॥

त्रिष्टुप् च जगती चापि तथातिजगती मता ।
शक्करी सातिपूर्वा स्यादष्टिरत्यष्टिरित्यपि ॥ २८ ॥

धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः ।
विकृतिः संस्कृतिश्चापि तथाभिकृतिरुत्कृतिः ॥ २९ ॥

**सातिपूर्वेति ।** अतिशक्करीत्यर्थः ॥ २८ ॥

दण्डकास्तूर्ध्वमेतेभ्यश्चण्डवृष्ट्यादयो मताः ।
शेषं गाथास्त्रिभिः षड्भिश्चरणैरुपलक्षिताः ॥ ३० ॥

**दण्डकास्त्विति ।** एतेभ्यः षड्विंशत्यक्षरपादपर्यन्तेभ्य उपरि सप्तविंशत्यक्षरपादप्रभृतयो दण्डका भवन्ति ॥ ३० ॥

एवं वर्णवृत्तसंज्ञां प्रोच्य मात्रावृत्तसंज्ञां दर्शयति - **मात्रावृत्तानीति ।**

मात्रावृत्तानि पथ्यादिनामान्याहुर्विपश्चितः ॥ ३१ ॥

---

(1) वृत्तरत्नाकरे छन्दोविचितौ च उक्तेति तवर्गप्रथमघटितनिर्देशः । छन्दोमञ्जर्यां छन्दःकौस्तुभे च उक्थेति तवर्गद्वितीययुतनिर्देशः ।

इति **श्रीच्छन्दःकौस्तुभे सञ्ज्ञानिबन्धः** प्रथमा प्रभा ॥ १ ॥

इति **श्रीविद्याभूषणविरचिते छन्दःकौस्तुभभाष्ये प्रथमा प्रभा** ॥ १ ॥

सममर्धसमं वृत्तमित्युक्तम् । क्रमप्राप्तसमवृत्ते भेदांस्तावदाह— तत्रैकाक्षरेत्यादिभिः ।

तत्रैकाक्षरोक्था यथा—

**श्रीः** ॥ 1 ॥ **1.** [1]अक्षरम् ॥

गुःऽ श्रीः ॥ १ ॥ [2]चतुर्थपादात्पद्यपूर्तिः ।

**श्रीरिति** । यत्र प्रतिपादमेको गुरुस्तत् श्रीच्छन्दः । उदाहरणम् , श्रीशः शास्ताम् ।

द्व्यक्षरात्युक्था यथा—

**स्त्री** ॥ 2 ॥ **2.** अक्षरे ॥

गौ स्त्री ॥ २ ॥

**द्व्यक्षरेति । गौ स्त्रीति ।** यत्र प्रतिपादं गुरुद्वयं स्यात् तत् स्त्रीच्छन्दः । गोपस्त्रीभिः कृष्णो रेमे ॥ २ ॥

त्र्यक्षरा मध्यमा यथा—

**नारी** ॥ 3 ॥ **3.** अक्षराणि ॥

मो नारी ॥ ३ ॥

**त्र्यक्षरेति । मो नारीति ।** यत्र प्रतिपादं मगणस्तन्नारीच्छन्दः । गोपानां नारीभिः श्लिष्टोऽव्यात् कृष्णो वः ॥ ३ ॥

---

1. अत्र सर्वत्र लक्षणेषु सुखबोधाय प्रतिपादं नियतानां लक्षणवाक्यात् लब्धानामक्षराणां संख्यापि निर्दिष्टा वर्तते ॥

2. सर्वत्र समवृत्तेषु एकैकस्मिन्नेव पादे (श्लोकचतुर्थभागे) तत्तल्लक्षणानां पूर्णत्वात्तथा तत्तद्वृत्तलक्षणवाक्योदितसंख्याकाक्षरसहिततत्तल्लक्षणविशिष्टैश्चतुर्भिरेव पादैः पद्यस्य तत्तच्छ्लोकस्य पूर्तिर्दृष्टेत्यर्थः ॥ वृत्तलक्षणलक्ष्यभागाश्चत्वार इति भावः ।

**मृगी** ॥ 4 ॥ 3. अक्षराणि ॥

रो मृगी ॥ ४ ॥

**रो मृगीति ।** यत्र प्रतिपादं रगणस्तन्मृगीच्छन्दः । सा मृगीलोचना राधिका व्याहरत् ॥ ४ ॥

चतुरक्षरा प्रतिष्ठा यथा—

**कन्या** ॥ 5 ॥ 4. अक्षराणि ॥

ग्मौ चेत्कन्या ॥ ५ ॥

**चतुरक्षरेति । ग्मौ चेत्कन्येति ।** गुरुर्मगणश्चेत्कन्याच्छन्दः । कृष्णो यस्यां चेतश्चक्रे सेयं भानोः कन्या धन्या ॥ ५ ॥

**सती** ॥ 6 ॥ 4. अक्षराणि ॥

नगि सती ॥ ६ ॥

**नगि सतीति ।** यत्र प्रतिपादं नगणगुरू स्यातां तत्सती च्छन्दः । मधुरिपो तव वचः पिबति सा किल सती । एवमग्रेऽप्युदाहरणानि कल्प्यानि ॥ ६ ॥

पञ्चाक्षरा सुप्रतिष्ठा यथा—

**पङ्क्तिः** ॥ 7 ॥ 5. अक्षराणि ॥

भ्गौ गिति पङ्क्तिः ॥ ७ ॥

**पञ्चाक्षरेति । भ्गौ गीति ।** भगणो गुरुद्वयं चेत् पङ्क्तिच्छन्दः ॥ ७ ॥

**प्रिया** ॥ 8 ॥ 5. अक्षराणि ॥

सलगैः प्रिया ॥ ८ ॥

**सलगैरिति ।** यत्र सगणलघुगुरवः स्युस्तत् प्रियाच्छन्दः ॥ ८ ॥

षडक्षरा गायत्री यथा—

**तनुमध्या** ॥ 9 ॥ 6. अक्षराणि ॥

त्यौ चेत्तनुमध्या ॥ ९ ॥

**षडक्षरेति । त्यौ चेदिति ।** तगणयगणौ यत्र प्रतिपादं स्यातां, तत्तनुमध्याच्छन्दः ॥ ९ ॥

**शशिवदना** ॥ 10 ॥ 6. अक्षराणि ॥

शशिवदना न्यौ ॥ १० ॥

**शशीति ।** यत्र नगणयगणौ स्यातां, तत् शशिवदनाच्छन्दः ॥ १० ॥

**सोमराजी** ॥ 11 ॥ 6. अक्षराणि ॥

द्विया सोमराजी ॥ ११ ॥

**द्वियेति ।** यत्र यगणद्वयं, तत् सोमराजीच्छन्दः ॥ ११ ॥

**वसुमती** ॥ 12 ॥ 6. अक्षराणि ॥

त्सौ चेद्वसुमती ॥ १२ ॥

**त्सौ चेदिति ।** यत्र तगणसगणौ स्यातां, तद्वसुमतीच्छन्दः ॥ १२ ॥

**मधुमती** ॥ 13 ॥ 7. अक्षराणि ॥

सप्ताक्षरोष्णिग्यथा—

ननगि मधुमती ॥ १३ ॥

**सप्ताक्षरेति । ननगीति ।** नगणौ गुरुश्चेन्मधुमतीच्छन्दः ॥ १३ ॥

**कुमारललिता** ॥ 14 ॥ 7. अक्षराणि ॥

कुमारललिता ज्सौग् ॥ १४ ॥

**कुमारेति ।** जगणसगणगुरवश्चेत् कुमारललिता च्छन्दः ॥ १४ ॥

**मदलेखा** ॥ 15 ॥ 7. अक्षराणि ॥

म्सौ गः स्यान्मदलेखा ॥ १५ ॥

**म्सौ ग** इति । मगणसगणगुरवश्चेत् मदलेखाच्छन्दः ॥ १५ ॥

**चूडामणिः** ॥ 16 ॥ 7. अक्षराणि ॥

चूडामणिस्तभगाः ॥ १६ ॥

**चूडेति ।** तगणभगणगुरवश्चेच्चूडामणिच्छन्दः ॥ १६ ॥

**हंसमाला** ॥ 17 ॥ 7. अक्षराणि ॥

सरगा हंसमाला ॥ १७ ॥

**सरगा** इति । सगणरगणगुरवश्चेत् हंसमालाच्छन्दः ॥ १७ ॥

**चित्रपदा** ॥ 18 ॥ 8. अक्षराणि ॥

अष्टाक्षरानुष्टुप् यथा—

चित्रपदा यदि भौ गौ ॥ १८ ॥

**अष्टाक्षरेति । चित्रेति ।** यत्र भगणौ गुरू च स्यातां, तच्चित्रपदाच्छन्दः ॥ १८ ॥

**विद्युन्माला** ॥ 19 ॥ 8. अक्षराणि ॥

मो मो गो गो विद्युन्माला ॥ १९ ॥

**मोम इति ।** यत्र मगणौ गुरू च स्यातां, तद्विद्युन्मालाच्छन्दः ॥ १९ ॥

**माणवकम्** ॥ 20 ॥ 8. अक्षराणि ॥

भात् तलगा माणवकम् ॥ २० ॥

**भात्तेति ।** भगणतगणलघुगुरवश्चेन्माणवकच्छन्दः ॥ २० ॥

**हंसरुतम्** ॥ 21 ॥ 8. अक्षराणि ॥

म्नौ गौ हंसरुतमेतत् ॥ २१ ॥

**म्नौ गाविति ।** मगणनगणौ गुरू च यत्र स्यातां, तत् हंसरुतच्छन्दः ॥ २१ ॥

**समानिका** ॥ 22 ॥ 8. अक्षराणि ॥

ग्लौ रजौ समानिका तु ॥ २२ ॥

**ग्लाविति ।** यत्र गुरुलघू रगणजगणौ च स्यातां, तत् समानीच्छन्दः । छन्दोऽनुरोधात् स्वार्थे कः ॥ २२ ॥

**प्रमाणिका** ॥ 23 ॥ 8. अक्षराणि ॥

प्रमाणिका जरौ लगौ ॥ २३ ॥

**प्रमाणिकेति ।** यत्र जगणरगणौ लघुगुरू च स्यातां, तत् प्रमाणीच्छन्दः ॥ २३ ॥

**वितानम्** ॥ 24 ॥ 8. अक्षराणि ॥

वितानमाभ्यां यदन्यत् ॥ २४ ॥

**वितानमिति ।** अनुष्टुभि जातौ समानिकाप्रमाणिकाभ्यां यदन्यच्छन्दो दृश्यते तद्वितानसंज्ञम् । यथा—

गोविन्द म(ज्ज)[ब्ज]लोचनं (किं) [कं]दर्पदर्पमोचनम् ।

संसारबन्धनाशनं वन्दे हरादिशासनम् ॥

इत्यादि । अन्ये त्वाहुः—ननु गोविन्दमित्येतन्नाराचकमेवेति नाममात्रेण भेदः । एवं चित्रपदादिकमपि वी[वि]तानं स्यादिति चेत्तत्राह— यदन्यदिति । गुरुलघुक्रमेण समानीपादसमाप्तिः । लघुगुरुक्रमेण प्रमाणीपादसमाप्तिः । विताने तु द्वौ गुरू द्वौ लघू द्वौ गुरू द्वौ लघू [द्वौ लघू द्वौ गुरू द्वौ लघू द्वौ गुरू]—इत्यनेन क्रमेण पादसमाप्तिर्भवेदिति । तत्राद्यस्योदाहरणम्—'कृष्णं भज तृष्णां त्यज' इत्यादि । द्वितीयस्य तु, 'हृदयं यस्य विशालम्, इत्यादि । [1]मूलोदाहरणं तु जगणतगणगुरुलघुरूपम् ॥ २४ ॥

**नाराचकम्** ॥ 25 ॥ 8. अक्षराणि ॥

नाराचकं तरौ लगौ ॥ २५ ॥

---

1. "वितानमाभ्यां" इत्यादि लक्षणवाक्यम् ।

**नाराचकेति ।** यत्र तगणरगणौ लघुगुरू च स्यातां, तन्नाराचकच्छन्दः ॥ २५ ॥

**पद्ममाला** ॥ 26 ॥ 8. अक्षराणि ॥

पद्ममाला च रौ द्वौ गौ ॥ २६ ॥

**पद्मेति ।** यत्र रगणद्वयं गुरुद्वयं च स्यात्, तत्पद्ममालाच्छन्दः ॥ २६ ॥

**सुचन्द्राभा** ॥ 27 ॥ 8. अक्षराणि ॥

सुचन्द्राभा यरौ ग्लौ च ॥ २७ ॥

**सुचन्द्रेति ।** यत्र यगणरगणौ गुरुलघू च स्यातां, तत् सुचन्द्राभाच्छन्दः ॥ २७ ॥

**सुविलासा** ॥ 28 ॥ 8. अक्षराणि ॥

सुविलासा सरौ ग्लौ, हि ॥ २८ ॥

**सुविलासेति ।** यत्र सगणरगणौ गुरुलघू च स्यातां, तत् सुविलासाच्छन्दः ॥ २८ ॥

**हलमुखी** ॥ 29 ॥ 9. अक्षराणि ॥

नवाक्षरा बृहती यथा—

रान्सराविह हलमुखी ॥ २९ ॥

**नवाक्षरेति । रान्नेति ।** रगणनगणसगणाश्चेत् हलमुखीच्छन्दः ॥ २९ ॥

**भुजगशिशुसृता** ॥ 30 ॥ 9. अक्षराणि ॥

भुजगशिशुसृता नौ मः ॥ ३० ॥

भृतेति केचित् ।

**भुजगेति ।** यत्र नगणद्वयं मगणश्च स्यात्, तद्भुजगशिशुसृताच्छन्दः ॥ ३० ॥

**उपजातिः** ॥ **42** ॥ **11.** अक्षराणि ॥

अनन्तरोदीरितलक्ष्मभाजौ
पादौ यदीयावुपजातयस्ताः ।
इत्थं किलान्यास्वपि मिश्रितासु
स्मरन्ति जातिष्विदमेव नाम ॥ ४२ ॥

**अनन्तरेति** । यदीयौ पादौ अनन्तरोदीरितलक्ष्मभाजौ इन्द्रवज्रोपेन्द्रवज्रालक्षणयुक्तौ स्यातां, ता उपजातयो भवेयुः, भेदान्तरोपलक्षणमेतत् । इत्थमन्यासु च जातिषु प्रागुक्तास्वतः परं वक्ष्यमाणासु च मिलितासूपजातयो भवन्ति । जगत्यां यथा वंशस्थविलेन्द्रवंशयोर्योगिता बोध्या ॥ ४२ ॥

**उपस्थिता** ॥ 43 ॥ **11.** अक्षराणि ॥

त्जौ ज्गौ गुरुणेयमुपस्थिता स्यात् ॥ ४३ ॥

**त्जाविति** । तगणो जगणद्वयं गुरुद्वयं च यत्र स्यात्तदुपस्थिताच्छन्दः ॥ ४३ ॥

**सुमुखी** ॥ 44 ॥ **11.** अक्षराणि ॥

नजजलगैर्गदिता सुमुखी ॥ ४४ ॥

**नजेति** । नगणो जगणद्वयं लघुगुरू च यदि स्युस्तदा सुमुखीच्छन्दः ॥ ४४ ॥

**शालिनी** ॥ 45 ॥ **11.** अक्षराणि ॥

मात्तौ गौ चेच्छालिनी वेदलोकैः ॥ ४५ ॥

**मात्ताविति** । शालिनीच्छन्दसि मगणस्तगणद्वयं गुरुद्वयं च भवति । चतुर्भिः सप्तभिश्च यतिरित्यर्थः ॥ ४५ ॥

**दोधकम्** ॥ 46 ॥ **11.** अक्षराणि ॥

दोधकमिच्छति भत्रितयाद्गौ ॥ ४६ ॥

**दोधकमिति** । भगणत्रयं गुरुद्वयं च यत्र स्यात्तत् दोधकच्छन्दः ॥ ४६ ॥

**वातोर्मी** ॥ 47 ॥ 11. अक्षराणि ॥

वातोर्मीयं गदिता म्भौ तगौ गः ॥ ४७ ॥

**वातोर्मीति** । मगणभगणतगणा गुरू च यत्र स्युस्तद्वातोर्मीच्छन्दः ॥ ४७ ॥

**भ्रमरविलसिता** ॥ 48 ॥ 11. अक्षराणि ॥

मो गो नौ गो भ्रमरविलसिता ॥ ४८ ॥

**मो ग** इति । यत्र मगुरू नगणद्वयं गुरुश्च संति, तद्भ्रमरविलसिताच्छन्दः ॥ ४८ ॥

**रथोद्धता** ॥ 49 ॥ 11. अक्षराणि ॥

रात्परैर्नरलगै रथोद्धता ॥ ४९ ॥

**रात्परैरिति** । रगणनगणरगणलघुगुरुभी रथोद्धताच्छन्दः ॥ ४९ ॥

**स्वागता** ॥ 50 ॥ 11. अक्षराणि ॥

स्वागता रनभगैर्गुरुणा च ॥ ५० ॥

**स्वागतेति** । रगणनगणभगणा गुरू च यत्र स्युस्तत्र स्वागताच्छन्दः ॥ ५० ॥

**वृत्ता** ॥ 51 ॥ 11. अक्षराणि ॥

ननसगुगुरुरचिता वृत्ता ॥ ५१ ॥

**ननसेति** । यत्र नगणद्वयं सगणो गुरुद्वयं च स्यात्तत् वृत्ताच्छन्दः ॥ ५१ ॥

**भद्रिका** ॥ 52 ॥ 11. अक्षराणि ॥

ननरलगुरुभिस्तु भद्रिका ॥ ५२ ॥

**ननेति** । यत्र नगणद्वयं रगणो लघुगुरू च भवन्ति, तद्भद्रिकाच्छन्दः ॥ ५२ ॥

**श्येनी** ॥ 53 ॥ **11.** अक्षराणि ॥

श्येन्युदीरिता रजौ रलौ गुरुः ॥ ५३ ॥

**श्येनीति** । रगणजगणौ रगणलघुगुरवश्च यत्र स्युस्तत् श्येनीच्छन्दः ॥ ५३ ॥

**उपस्थितम्** ॥ 54 ॥ **11.** अक्षराणि ॥

उपस्थितमिदं ज्सौ ताद्गकारौ ॥ ५४ ॥

**उपस्थितमिति** । यत्र जगणसगणतगणा गुरुद्वयं च भवन्ति, तदुपस्थितच्छन्दः ॥ ५४ ॥

**श्रीः** ॥ 55 ॥ **11.** अक्षराणि ॥

पञ्चरसैः श्रीर्भतनगुगाश्चेत् ॥ ५५ ॥

**पञ्चेति** । भगणतगणनगणा गुरुद्वयं च यदि स्युर्यदा पञ्चभिः षड्भिश्च यतिः स्यात्तदा श्रीच्छन्दः ॥ ५५ ॥

**शिखण्डितम्** ॥ 56 ॥ **11.** अक्षराणि ॥

शिखण्डितमिदं ज्सौ ताद्गुरू षट् ॥ ५६ ॥

**शिखण्डितमिति** । जगणसगणौ तगणगुरुद्वये च यत्र स्यातां, तच्छिखण्डितच्छन्दः । षड्भिर्यतिः ॥ ५६ ॥

**अनुकूला** ॥ 57 ॥ **11.** अक्षराणि ॥

स्यादनुकूला भतनगुगाश्चेत् ।

इयं मौक्तिकमालेति [1]केचित् ॥ ५७ ॥

**स्यादिति** । भगणतगणनगणा गुरुयुगलं च यत्र स्यात्तदनुकूलाच्छन्दः ॥ ५७ ॥

---

1. केचिदिति । वृत्तरत्नाकरकर्त्रादयः । अत्र वृत्तरत्नाकरे च एकलक्षणं वृत्तद्वयं "श्रीरिति अनुकूलेति" च वर्णितम् । छन्दोमञ्जर्यां तु अनुकूला परं वर्णिता ।

**मोटनकम्** ॥ 58 ॥ **11.** अक्षराणि ॥

स्यान्मोटनकं तजजाश्च लगौ ॥ ५८ ॥

**स्यान्मोटेति** । यत्र तगणो जगणद्वयं लघुगुरू च भवन्ति, तन्मोट(क)[नक]च्छन्दः ॥ ५८ ॥

**सान्द्रपदम्** ॥ 59 ॥ **11.** अक्षराणि ॥

सान्द्रपदं भ्तौ नगुलघुभिश्च ॥ ५९ ॥

**सान्द्रपदमिति** । यत्र भगणतगणनगणा गुरुर्लघू च भवन्ति, तत्सान्द्रपदच्छन्दः ॥ ५९ ॥

**चन्द्रवर्त्म** ॥ 60 ॥ **12.** अक्षराणि ॥

द्वादशाक्षरा जगती यथा—

चन्द्रवर्त्म निगदन्ति रनभसैः ॥ ६० ॥

**द्वादशाक्षरेति** । **चन्द्रेति** । रगणनगणभगणसगणैश्चन्द्रवर्त्मच्छन्दः ॥ ६० ॥

**वंशस्थविलम्** ॥ 61 ॥ **12.** अक्षराणि ॥

वदन्ति वंशस्थविलं जतौ जरौ ॥ ६१ ॥

वंशस्तनितमित्यन्ये ।

**वदन्तीति** । यत्र जगणतगणौ जगणरगणौ च स्यातां, तद्वंशस्थविलच्छन्दः ॥ ६१ ॥

**इन्द्रवंशा** ॥ 62 ॥ **12.** अक्षराणि ॥

तच्चेन्द्रवंशा प्रथमाक्षरे गुरौ ॥ ६२ ॥

[1]**तच्चेति** । तगणौ जगणरगणौ च यत्र स्यातां, तदिन्द्रवंशाच्छन्दः ॥ ६२ ॥

---

1. तच्चेतीति । तच्च तदेव वंशस्थविलमेव इन्द्रवंशा भवति, प्रथमाक्षरे गुरौ गुरुभूते सति । तथा च वंशस्थविले जगणस्यादित्वात् प्रथमाक्षरं लघुभूतं, मध्यगुरुत्वात् जगणस्य ।

**जलोद्धतगतिः** ॥ 63 ॥ 12. अक्षराणि ॥

रसैर्जसजसा जलोद्धतगतिः ॥ ६३ ॥

**रसैरिति ।** यत्र जगणसगणौ द्विः स्यातां यतिश्च षड्भिस्तज्जलोद्धतगतिच्छन्दः ॥ ६३ ॥

**तोटकम्** ॥ 64 ॥ 12. अक्षराणि ॥

इह तोटकमम्बुधिसैर्गदितम् ॥ ६४ ॥

**इहेति ।** चतुर्भिस्सगणैस्तोटकच्छन्दः ॥ ६४ ॥

**द्रुतविलंबितम्** ॥ 65 ॥ 12. अक्षराणि ॥

द्रुतविलम्बितमाह नभौ भरौ ॥ ६५ ॥

**द्रुतेति ।** नगणभगणौ भगणरगणौ च यदि स्यातां, तर्हि द्रुतविलम्बितच्छन्दः ॥ ६५ ॥

**पुटः** ॥ 66 ॥ 12. अक्षराणि ॥

वसुयुगविरतिर्नौ म्यौ पुटोऽयम् ॥ ६६ ॥

**वसुयुगेति ।** नगणौ मगणयगणौ च यदि स्यातां, अष्टाभिश्चतुर्भिश्च [विर]तिस्तदा पुटच्छन्दः ॥ ६६ ॥

**मौक्तिकदाम** ॥ 67 ॥ 12. अक्षराणि ॥

चतुर्जगणैर्वद मौक्तिकदाम ॥ ६७ ॥

**चतुरिति ।** चतुर्भिर्जगणैर्मौक्तिकदामच्छन्दः ॥ ६७ ॥

---

अत्र प्रथमस्याप्यक्षरस्य गुरुत्वे द्वितीयस्यापि गुरुत्वात् अन्त्यलघुर्गणः प्रथमो भवति । स च तगण एव । ततश्च तगणः प्रथम इन्द्रवंशायां भवति । इतरत् वंशस्थविलगणजातं तगणजगण रगणत्रयं चात्र भवति । अतस्तगणद्वयं चात्रादौ भवति । अतस्तगणद्वयं जगणरगणाविति फलितम् - तदाह • तगणाविति ।

**स्रग्विणी** ॥ 68 ॥ 12. अक्षराणि ॥

कीर्तितैषा चतूरेफिका स्रग्विणी ॥ ६८ ॥

**कीर्तितेति ।** चतुर्भी रगणैः स्रग्विणीच्छन्दः ॥ ६८ ॥

**वैश्वदेवी** ॥ 69 ॥ 12. अक्षराणि ॥

बाणाश्वैश्छिन्ना वैश्वदेवी ममौ यौ ॥ ६९ ॥

**बाणेति ।** यत्र मगणौ यगणौ च स्यातां, पञ्चभिस्सप्तभिश्च यतिरपि भवेत्, तद्वैश्वदेवीच्छन्दः ॥ ६९ ॥

**प्रमिताक्षरा** ॥ 70 ॥ 12. अक्षराणि ॥

प्रमिताक्षरा सजससैर्गदिता ॥ ७० ॥

**प्रमितेति ।** यत्र सगणजगणौ सगणद्वयं च भवन्ति, तत्प्रमिताक्षराच्छन्दः ॥ ७० ॥

**मन्दाकिनी** ॥ 71 ॥ 12. अक्षराणि ।

ननररघटिता तु मन्दाकिनी ॥ ७१ ॥

प्रमुदितवदनेति केचित् ।

**ननरेति ।** नगणद्वयेन रगणद्वयेन मन्दाकिनीच्छन्दः ॥ ७१ ॥

**कुसुमविचित्रा** ॥ 72 ॥ 12. अक्षराणि ॥

नयसहितौ न्यौ कुसुमविचित्रा ॥ ७२ ॥

**नयेति ।** यत्र नगणयगणौ द्विः स्यातां, तत् कुसुमविचित्राच्छन्दः ॥ ७२ ॥

**तामरसम्** ॥ 73 ॥ 12. अक्षराणि ॥

इह वद तामरसं नजजा यः ॥ ७३ ॥

**इह वदेति ।** यत्र नगणो जगणद्वयं यगणश्च स्यात्तत्तामरसच्छन्दः ॥ ७३ ॥

**मालती** ॥ 74 ॥ 12. अक्षराणि ॥

भवति नजावथ मालती जरौ ॥ ७४ ॥

यमुनेति केचित् ।

**भवतीति ।** नगणजगणौ जगणरगणौ च यत्र स्यातां, तदा मालती-च्छन्दः ॥ ७४ ॥

**भुजङ्गप्रयातम्** ॥ 75 ॥ 12. अक्षराणि ॥

भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः ॥ ७५ ॥

[ **भुजङ्गेति ।** चतुर्भिर्यगणैः भुजङ्गप्रयातं छन्दः ] ॥ ७५ ॥

**प्रियंवदा** ॥ 76 ॥ 12. अक्षराणि ॥

इह भवेन्नभजरैः प्रियंवदा ॥ ७६ ॥

**इह भवेदिति ।** नगणभगणौ जगणरगणौ च यदि स्यातां, तर्हि प्रियंवदा-च्छन्दः ॥ ७६ ॥

**मणिमाला** ॥ 77 ॥ 12. अक्षराणि ॥

त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः ॥ ७७ ॥

**त्यौ त्याविति ।** यत्र तगणयगणौ द्विः स्यातां, यतिश्च षड्भिस्तन्मणि-मालाच्छन्दः ॥ ७७ ॥

**पुष्पविचित्रा** ॥ 78 ॥ 12. अक्षराणि ॥

त्यौ त्याविति निर्दिष्टा पुष्पविचित्रा ॥ ७८ ॥

**त्यौ त्याविति ।** मणिमालैव यतेरभावे पुष्प**विच्छिन्ना**च्छन्दः ॥ ७८ ॥

**विभावरी** ॥ 79 ॥ 12. अक्षराणि ॥

विभावरी तु सा जरौ जरौ यतः ।

पञ्चचामरमित्यन्ये ॥ ७९ ॥

**विभावरीति ।** यत्र जगणरगणौ द्विः पठितौ, तद्विभावरीच्छन्दः ॥ ७९ ॥

**ललिता** ॥ 80 ॥ 12. अक्षराणि ॥

धीरैरभाणि ललिता तभौ जरौ ॥ ८० ॥

**धीरैरिति ।** यत्र तगणभगणौ जगणरगणौ च स्यातां, तल्ललिताच्छन्दः ॥ ८० ॥

**उज्ज्वला** ॥ 81 ॥ 12. अक्षराणि ॥

ननभररचिता कथितोज्ज्वला ॥ ८१ ॥

**ननभेति ।** नगणद्वयेन भगणरगणाभ्यां च [उज्ज्वला] छन्दः ॥ ८१ ॥

**जलधरमाला** ॥ 82 ॥ 12. अक्षराणि ॥

अब्ध्यङ्गैः स्याज्जलधरमाला म्भस्माः ॥ ८२ ॥

**अब्ध्यङ्गैरिति ।** मगणभगणौ सगणमगणौ च यदि स्यातां, चतुर्भिरष्टभिश्च यतिस्तदा जलधरमालाच्छन्दः ॥ ८२ ॥

**नवमालिनी** ॥ 83 ॥ 12. अक्षराणि ॥

भुवि नवमालिनी नजभयैः स्यात् ॥ ८३ ॥

**भुवीति ।** नगणजगणाभ्यां भगणयगणाभ्यां च नवमालिनीच्छन्दः ॥ ८३ ॥

**प्रभा** ॥ 84 ॥ 12. अक्षराणि ॥

स्वरशरविरतिर्ननौ रौ प्रभा ॥ ८४ ॥

**स्वरेति ।** नगणद्वयं रगणद्वयं च यत्र स्यात्सप्तभिः पञ्चभिश्च यतिस्तत्प्रभाच्छन्दः ॥ ८४ ॥

**प्रहर्षिणी** ॥ 85 ॥ 13. अक्षराणि ॥

त्रयोदशाक्षरातिजगती यथा—

(आ····भि) [त्र्याशाभिः] मनजरगाः प्रहर्षिणीयम् ॥ ८५ ॥

**त्रयोदशाक्षरेति । (आस्तीभिरिति) । [त्र्याशाभिरिति] ।** मगणनगणौ जगणरगणौ गुरुश्च यत्र भवन्ति, त्रिभिः दशभिश्च यतिस्तत्प्रहर्षिणीच्छन्दः ॥ ८५ ॥

**क्षमा** ॥ 86 ॥ 13. अक्षराणि

तुरगरसयतिर्नौ ततौ गः क्षमा ॥ ८६ ॥

**तुरगेति ।** नगणद्वयं तगणद्वयं गुरुश्च यत्र स्यात्सप्तभिः षड्भिश्च यतिस्तत क्षमाच्छन्दः ॥ ८६ ॥

**रुचिरा** ॥ 87 ॥ 13. अक्षराणि ॥

जभौ सजौ गिति रुचिरा चतुर्ग्रहैः ॥ ८७ ॥

**जभाविति ।** जगणभगणौ सगणजगणौ गुरुश्च यत्र स्युश्चतुर्भिर्नवभिश्च यतिस्तद्रुचिराच्छन्दः ॥ ८७ ॥

**चण्डी** ॥ 88 ॥ 13. अक्षराणि ॥

प्रभवति ननससगैरिह चण्डी ॥ ८८ ॥

**प्रभवतीति ।** नगणद्वयं सगणद्वयं गुरुश्च यदि स्यात्तदा चण्डीच्छन्दः ॥ ८८ ॥

**मत्तमयूरम्** ॥ 89 ॥ 13. अक्षराणि ॥

वेदै रन्ध्रैर्म्तौ यसगा मत्तमयूरम् ॥ ८९ ॥

**वेदैरिति ।** मगणतगणौ यगणसगणौ गुरुश्चैते यत्र स्युश्चतुर्भिर्नवभिश्च यतिस्तन्मत्तमयूरच्छन्दः ॥ ८९ ॥

**गौरी** ॥ 90 ॥ 13. अक्षराणि ॥

भवति भुवि ननसरैर्गेन गौरी ॥ ९० ॥

**भवति भुवीति ।** नगणद्वयं सगणरगणौ गुरुश्चैते यत्र स्युस्तद्गौरीच्छन्दः ॥ ९० ॥

**कुटिलगतिः** ॥ 91 ॥ 13. अक्षराणि ॥

कुटिलगतिर्नजौ सप्तषड्भिस्त्मौ गः ॥ ९१ ॥

= ||| |S| SS| SSS S =[1]

**कुटिलेति ।** यत्र नगणजगणौ तगणमगणौ गुरुश्च भवन्ति, सप्तभिः षड्भिश्च यतिस्तत्कुटिलगतिच्छन्दः ॥ ९१ ॥

**उपस्थितम्** ॥ 92 ॥ 13. अक्षराणि ॥

उपस्थितमिदं ज्सौ त्सौ सगुरुकौ चेत् ॥ ९२ ॥

**उपस्थितेति ।** यत्र जगणसगणौ तगणसगणौ गुरुश्च भवन्ति, तदुपस्थितं छन्दः ॥ ९२ ॥

**मञ्जुभाषिणी** ॥ 93 ॥ 13. अक्षराणि ॥

सजसा जगौ च यदि मञ्जुभाषिणी ॥ ९३ ॥

इयं सुमंगलेति, प्रबोधितेति, सुनन्दिनीति, चान्यत्र ।

**सजसा इति ।** यत्र सगणजगणौ द्विःपठितौ गुरुश्चैकस्तन्मञ्जुभाषिणीच्छन्दः ॥ ९३ ॥

**सन्धिवर्षिणी** ॥ 94 ॥ 13. अक्षराणि ॥

जतौ सजौ गो भवति सन्धिवर्षिणी ॥ ९४ ॥

**जताविति ।** जगणतगणौ सगणजगणौ गुरुश्च यत्र स्यात्तत् सन्धिवर्षिणीच्छन्दः ॥ ९४ ॥

**चन्द्रिका** ॥ 95 ॥ 13. अक्षराणि ॥

ननततगुरुभिश्चन्द्रिका सप्तभिः ॥ ९५ ॥

उत्पलिनीति केचित ।

---

1. अत्र वृत्ते वक्रर्जुभ्यां रेखाभ्यामपि गणा निर्दिश्यन्ते ।

**ननततेति ।** नगणयोस्तगणयोश्च युगलेन गुरुणा चन्द्रिकाच्छन्दः । सप्तभिः षड्भिश्च तस्मिन् यतिरित्यर्थः ॥ ९५ ॥

**नन्दिनी** ॥ 96 ॥ 13. अक्षराणि ॥

इह नन्दिनी सजससैर्गुरुयुक्तैः ॥ ९६ ॥

कलहंसः, कुटिलः, सिंहनादश्चेत्यन्ये ।

**इहेति ।** सगणजगणौ सगणद्वयं गुरुश्चैते यत्र स्युस्तन्नन्दिनीच्छन्दः ॥ ९६ ॥

**मृगेन्द्रमुखम्** ॥ 97 ॥ 13. अक्षराणि ॥

भवति मृगेन्द्रमुखं नजौ जरौ गः ॥ ९७ ॥

**भवतीति ।** नगणजगणौ जगणरगणौ गुरुश्च यदि स्यातां, तर्हि मृगेन्द्रमुखच्छन्दः ॥ ९७ ॥

**असंबाधा** ॥ 98 ॥ 14. अक्षराणि ॥

चतुर्दशाक्षरा शक्करी यथा—

मो गो गो नौ मः शरनवभिरसम्बाधा ॥ ९८ ॥

**चतुर्दशाक्षरेति । मो ग इति ।** मगणो गुरुद्वयं नगणद्वयं मगणश्च यत्र स्यात्पञ्चभिर्नवभिश्च विश्रामस्तदसम्बाधाच्छन्दः ॥ ९८ ॥

**अपराजिता** ॥ 99 ॥ 14. अक्षराणि ॥

ननरसलघुगैः स्वरैरपराजिता ॥ ९९ ॥

**ननरसेति ।** नगणौ रगणसगणौ लघुगुरू च यदि भवेतां, यतिश्च सप्तभिस्तह्यपराजिताच्छन्दः ॥ ९९ ॥

**वसन्ततिलका** ॥ 100 ॥ 14. अक्षराणि ॥

ज्ञेया वसन्ततिलका तभजा जगौ गः ॥ १०० ॥

इयमुद्धर्षिणीति, सिंहोद्धतेति, मधुमाधवीति च क्वचित् ।

**ज्ञेयेति ।** तगणो भगणो जगणयुगलं गुरुयुगलं यत्र स्यात्तद्वसन्ततिलकाच्छन्दः । केचित्तत्क्लीबमाहुः ॥ १०० ॥

**प्रहरणकलिका ॥ 101 ॥ 14. अक्षराणि ॥**

ननभनलगिति प्रहरणकलिका ॥ १०१ ॥

**ननभनेति ।** नगणद्वयं भगणनगणौ लघुगुरू चैते यत्र स्युस्तत् प्रहरणकलिकाच्छन्दः ॥ १०१ ॥

**वासन्ती ॥ 102 ॥ 14. अक्षराणि ॥**

मस्तो नो मो गौ यदि गदिता वासन्तीयम् ॥ १०२ ॥

**मस्त इति ।** मगणसगणौ नगणमगणौ गुरू च यत्र स्यातां, तद्वासन्तीच्छन्दः ॥ १०२ ॥

**लोला ॥ 103 ॥ 14. अक्षराणि ॥**

द्विस्सप्तच्छिदि लोला म्सौ म्भौ गौ चरणे चेत् ॥ १०३ ॥

**द्विस्सप्तेति ।** मगणसगणौ मगणभगणौ गुरू च यत्र स्यातां, सप्तभिः सप्तभिश्च विच्छेदस्तल्लोलाच्छन्दः ॥ १०३ ॥

**इन्दुवदना ॥ 104 ॥ 14. अक्षराणि ॥**

इन्दुवदना भजसनैः सगुरुयुग्मैः ॥ १०४ ॥

**इन्द्विति ।** यत्र भगणजगणसगणनगणाः स्युर्गुरुयुग्मं च, तदिन्दुवदनाच्छन्दः ॥ १०४ ॥

**नान्दीमुखी ॥ 105 ॥ 14. अक्षराणि ॥**

स्वरभिदि यदि नौ तौ च नान्दीमुखी गौ ॥ १०५ ॥

वसन्तोऽयमित्यन्ये ।

**स्वरेति ।** यत्र नगणयोस्तगणयोश्च युगलं गुरुयुगं च स्यात्, सप्तभिर्यतिस्तत् नान्दीमुखीच्छन्दः ॥ १०५ ॥

**वसुधा** ॥ 106 ॥ 14. अक्षराणि ॥

सजसा य्लगाश्च वसुधा सपञ्चग्रहैः ॥ १०६ ॥

**सजसा इति ।** यत्र सगणजगणौ सगणयगणौ लघुगुरू च स्यातां, तद्वसुधाच्छन्दः ॥ १०६ ॥

**कुटिलम्** ॥ 107 ॥ 14. अक्षराणि ॥

युगदिग्भिः कुटिलमिति मतं स्भौ न्यौ गौ ॥ १०७ ॥

**युगेति ।** सगणभगणौ नगणयगणौ गुरू च स्यातां, चतुर्भिर्दिग्भिश्च यतिर्भवेत्, तत् कुटिलच्छन्दः ॥ १०७ ॥

**शशिकला** ॥ 108 ॥ 15. अक्षराणि ॥

पञ्चदशाक्षरातिशकरी यथा—

द्विहतहयलघुरथ गिति शशिकला ॥ १०८ ॥

**पञ्चदशाक्षरेति । द्विहतेति ।** चतुर्दशलघवो गुरुश्चैको यत्र स्युस्तच्छशिकलाच्छन्दः ॥ १०८ ॥

स्रक् ॥ 109 ॥ 15. अक्षराणि ॥

स्रगिह भवति रसनवकयतिरियम् ॥ १०९ ॥

**स्रगिति ।** षड्भिर्नवभिश्च यतिश्चेद्भवति, तर्हि शशिकलैव स्रक्छन्दः ॥१०९॥

**गुणमणिनिकरः** ॥ 110 ॥ 15. अक्षराणि ॥

वसुमुनियतिरिह गुणमणिनिकरः ॥ ११० ॥

**वसुमुनीति ।** अष्टभिस्सप्तभिश्च यतिस्तर्हि गुणमणिनिकरोऽपि सैव भवति ॥ ११० ॥

**मालिनी** ॥ 111 ॥ 16. अक्षराणि ॥

ननमयययुतेयं मालिनी भोगिलोकैः ॥ १११ ॥

**ननमयेति ।** नगणद्वयेन मगणेन यगणद्वयेन च मालिनीच्छन्दः । अष्टभिस्सप्तभिश्च यतिरित्यर्थः ॥ १११ ॥

**प्रभद्रकम्** ॥ 112 ॥ 15. अक्षराणि ॥

भवति नजौ भजौ रसहितौ प्रभद्रकम् ॥ ११२ ॥
सुकेशरमित्यन्ये ।

**भवतीति ।** नगणजगणभगणजगणरगणैः प्रभद्रकच्छन्दः ॥ ११२ ॥

**एला** । ११३ ॥ 15. अक्षराणि ॥

सजना नयौ शरदशकविरतिरेला ॥ ११३ ॥

**सजना इति ।** यत्र सगणजगणौ नगणद्वय यगणश्चैते भवन्ति, तदेलाच्छन्दः । पञ्चभिर्दशभिश्च तस्मिन् यतिर्भवेत् ॥ ११३ ॥

**लीलाखेलः** ॥ 114 ॥ 15. अक्षराणि ॥

एकन्यूनौ विद्युन्मालापादौ चेल्लीलाखेलः ॥ ११४ ॥

**एकन्यूनाविति ।** [1]पञ्चदशभिर्गुरुभिर्लीलाखेलच्छन्दः ॥ ११४ ॥

**विपिनतिलकम्** । 115 ॥ 15. अक्षराणि ॥

विपिनतिलकं नसनरेफयुग्मैर्भवेत् ॥ ११५ ॥

**विपिनेति ।** नगणसगणाभ्यां नगणेन रगणयुग्मेन च विपिनतिलकच्छन्दः ॥ ११५ ॥

**चन्द्रलेखा** ॥ 116 ॥ 15. अक्षराणि ॥

म्रौ मो यौ चेद्भवेतां सप्ताष्टकैश्चन्द्रलेखा ॥ ११६ ॥

**म्रौ म इति ।** मगणरगणमगणयगणयुगलैश्चन्द्रलेखाच्छन्दः । सप्तिरष्टभिश्च तत्र यतिरित्यर्थः ॥ ११६ ॥

---

1. गुर्वष्टकयुक्तच्छन्दसो विद्युन्मालायाः पादद्वयस्य षोडशगुरुकत्वात् तत्रैके न्यूने शिष्टाः पञ्चदश गुरवः, तदाह—पञ्चदशभिरिति ।

**तूणकम्** ॥ **117** ॥ **15. अक्षराणि** ॥

तूणकं समानिकापदद्वयं विनान्तिमम् ॥ ११७ ॥

**तूणकमिति** । गुरुलघुरगणजगणैर्गुरुलघुरगणलघुगुरुमिश्रैत् (तूणकं) छन्दः ॥ ११७ ॥

**चित्रा चित्रम् वा** ॥ **118** ॥ **15. अक्षराणि** ॥

चित्रा नामच्छन्दश्चित्रं च त्रयो मा यकारौ ॥ ११८ ॥

**चित्रेति** । यत्र मगणत्रयं यगणद्वयं च स्यात्तच्चित्राच्छन्दः, चित्रं च तदेव कथ्यते ॥ ११८ ॥

**मृदङ्गकम्** ॥ 119 ॥ **15. अक्षराणि** ॥

छन्दो भवेत्तभजजै रयुतैर्मृदङ्गकम् ॥ ११९ ॥

**छन्दो भवेदिति** । तगणभगणाभ्यां जगणयुगेन रगणेन च [1]मृदङ्ग-च्छन्दः ॥ ११९ ॥

**चन्द्रकान्ताभिधा** ॥ 120 ॥ **15. अक्षराणि** ॥

चन्द्रकान्ताभिधा रौ म्यौ यो विरामे स्वराष्टौ ॥ १२० ॥

**चन्द्रेति** । रगणद्वयेन मगणेन यगणद्वयेन च चन्द्रकान्ताभिधाच्छन्दः । [ सप्तभिरष्टभिश्च तत्र यतिरित्यर्थः ] ॥ १२० ॥

**वृषभः** ॥ 121 ॥ **15. अक्षराणि** ॥

भवतः सजौ ससयुतौ वृषभस्ततो यः ॥ १२१ ॥

**भवत इति** । सगणजगणाभ्यां सगणद्वयेन यगणेन च वृषभच्छन्दः ॥ १२१ ॥

---

1. अत्रापि छन्दोऽनुरोधात् स्वार्थे कः ।

**चित्रसंज्ञम्** ॥ 122 ॥ 16. अक्षराणि ॥

अथ षोडशाक्षराष्टिर्यथा—

चित्रसंज्ञमीरितं समानिकापदद्वयं तु ॥ १२२ ॥

**षोडशाक्षरेति । चित्रेति ।** गुरुलघुरगणजगणा यत्र द्विःपठितास्तच्चित्रसंज्ञं छन्दः ॥ १२२ ॥

**पञ्चचामरम्** ॥ 123 ॥ 16. अक्षराणि ॥

प्रमाणिकापदद्वयं वदन्ति पञ्चचामरम् ॥ १२३ ॥

**प्रमाणिकेति ।** जगणरगणलघुगुरवो यत्र द्विःपठ्यन्ते, तत् पञ्चचामर-[1]च्छन्दो द्वितीयम् ॥ १२३ ॥

**ऋषभगजविलसितम्** ॥ 124 ॥ 16. अक्षराणि ॥

भ्रत्रिनगैः [2]स्वरात्खमृषभगजविलसितम् ॥ १२४ ॥

गजतुरगविलसितमित्यन्ये ।

**भ्रत्रीति ।** भगणरगणाभ्यां नगणत्रिकेण गुरुणा च ऋषभगजविलसित-च्छन्दः । [3]स्वरात् सप्तमवर्णात् यतिर्भवति । १२४ ॥

---

1. छन्दो द्वितीयमिति । अत्र कौस्तुभे षोडशाक्षराष्टिभेद एव पञ्चचामरं छन्द एकमेवोक्तम् । छन्दोमञ्जर्यामपि तथैव । वृत्तरत्नाकरे तु जगतीभेदेषु द्वादशाक्षरं "जरौ जरौ वदति पञ्चचामर" मित्येकमुक्तम् । द्वितीयं, तस्य नारायणभट्टीयटीकायां अष्टिभेदेषु षोडशाक्षरं "जरौ जरौ ततो जगौ च पञ्चचामरं वदेत्" इति कौस्तुभोक्तलक्षणसहितमेव पञ्चचामरमुक्तम् । तृतीयं तु तस्यामेव एकोनविंशाक्षरमतिधृतिभेदेषु "नयुगलल्गुरुनिरन्तरं सदा स पञ्चचामरः" ॥ इति किञ्चिदुक्तम् । अत्र द्वितीयमिति वदतो व्याख्यातुः पञ्चचामरद्वयं पञ्चचामरत्रयं वाभिमतं स्यात् । वस्तुतो जगतीच्छन्दसि "विभावरी तु सा जरौ जरौ यतः" पञ्चचामरमित्यन्ये" इति कौस्तुभकारस्य वचनात् तत् प्रथमं पञ्चचामरम्, अत्रोच्यमानं "प्रमाणिका .... पञ्चचामरम्" इत्येतत् द्वितीयमिति व्याख्याताभिप्रैतीति भाति ।

2. स्वरात् खमिति । स्वरात् सप्तमवर्णात् खं शून्यता वर्णविच्छेदः, तेन द्योत्यो यतिर्भवतीत्यर्थः ।

3. स्वराणां सप्तसंख्याकत्वात् स्वरशब्देन सप्तमवर्णो लक्ष्यत इति तदाह-स्वरादिति ।

**चकिता** ॥ 125 ॥ **16.** अक्षराणि ॥

भात्समतनगैरष्टच्छेदे स्यादिह चकिता ॥ १२५ ॥

**भात्सेति** । भगणसगणमगणैस्तगणनगणगुरुभिश्च चकिताच्छन्दः, । [ अष्टभिश्च छेदो भवति ] । छेदो यतिरित्यर्थः ॥ १२५ ॥

**मदनललिता** ॥ 126 ॥ 16. अक्षराणि ॥

म्भौ नो म्नौ गो मदनललिता वेदैः षड्तुभिः ॥ १२६ ॥

**म्भौ न इति** । मगणभगणनगणैर्मगणनगणगुरुभिर्मदनललिताच्छन्दः । चतुर्भिः षड्भिः षड्भिश्च तत्र यतिरित्यर्थः ॥ १२६ ॥

**मणिकल्पलता** ॥ 127 ॥ 16. अक्षराणि ॥

नजरभभेन गेन च स्यान्मणिकल्पलता ॥ १२७ ॥

**नजरभेति** । नगणजगणरगणैर्भगणद्वयेन गुरुणा च मणिकल्पलता-च्छन्दः ॥ १२७ ॥

**प्रवरललितम्** ॥ 128 ॥ 16. अक्षराणि ॥

यमौ नः स्तौ गश्चेत्प्रवरललितं नाम वृत्तम् ॥ १२८ ॥

**यमौ न इति** । यगणमगणनगणैः सगणतगणगुरुभिश्च प्रवरललित-च्छन्दः ॥ १२८ ॥

**वाणिनी** ॥ 129 ॥ 16. अक्षराणि ॥

नजभजरैः सदा भवति वाणिनी गयुक्तैः ॥ १२९ ॥

**नजभेति** । नगणजगणाभ्यां भगणजगणाभ्यां रगणगुरुभ्यां च वाणिनी-च्छन्दः ॥ १२९ ॥

**अचलधृतिः** ॥ 130 ॥ 16. अक्षराणि ॥

द्विगुणितवसुलघुभिरचलधृतिरिह ॥ १३० ॥

**द्विगुणितेति** । यत्र षोडश लघवः स्युस्तदचलधृतिच्छन्दः ॥ १३० ॥

**यतिः** ॥ 131 ॥ **16.** अक्षराणि ॥

पञ्चभकारकृता(श्च)[ श्च ]यतिर्यतिरन्तगुरुः ॥ १३१ ॥

**पञ्चभेति ।** यत्र पञ्च भगणा गुरुश्च स्युस्तद्यतिच्छन्दः । सप्तभिर्यतिश्च ॥१३१ ॥

**गरुडरुतम्** ॥ 132 ॥ **16.** अक्षराणि ॥

गरुडरुतं नजोभजतगा यदा स्युस्तदा ॥ १३२ ॥

**गरुडेति ।** नगणजगणौ भगणजगणौ तगणगुरू च यत्र स्यातां, तद्गरुडरुतच्छन्दः ॥ १३२ ॥

**शिखरिणी** ॥ 133 ॥ **17.** अक्षराणि ॥

सप्तदशाक्षरात्यष्टिर्यथा—

रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ॥ १३३ ॥

[ यत्र यगणमगणौ नगणसगणभगणा लघुगुरू च स्युस्तत् शिखरिणीच्छन्दः । षड्भिः एका ]दशभिश्च तत्र यतिरित्यर्थः ॥ १३३ ॥

**वंशपत्रपतितम्** ॥ 134 ॥ **17.** अक्षराणि ॥

दिङ्मुनि वंशपत्रपतितं भरनभनलगैः ॥ १३४ ॥
वंशदलमित्यन्ये ।

**दिङ्मुनीति ।** भगणरगणनगणभगणैर्नगणलघुगुरुभिश्च वंशपत्रपतितच्छन्दः । दशभिः सप्तभिश्च तत्र यतिरित्यर्थः । दिङ्मुनीति लुप्तविभक्तिको निर्देशः । ॥ १३४ ॥

**नर्दटकम्** ॥ 135 ॥ **17.** अक्षराणि ॥

यदि भवतो नजौ भजजला गुरु नर्दटकम् ॥ १३५ ॥

**यदीति ।** नगणजगणभगणा जगणद्वयं लघुगुरू च यत्र स्युस्तन्नर्दटकच्छन्दः । नर्कुटकमित्यन्ये ॥ १३५ ॥

**कोकिलकः** ॥ 136 ॥ 17. अक्षराणि ॥

हयऋतुसागरैर्यतियुतं वद कोकिलकम् ॥ १३६ ॥

**हयेति** । सप्तभिः षड्भिश्चतुर्भिर्यतिश्चेत्तदा नर्दटकमेव कोकिलकं वद कथय[1](व)[ब]त कोकिलकमित्यन्ये ॥ १३६ ॥

**पृथ्वी** ॥ 137 ॥ 17. अक्षराणि ॥

जसौ जसयला वसुग्रहयतिस्तु पृथ्वी गुरुः ॥ १३७ ॥

**जसाविति** । यत्र जगणसगणौ द्विःपठितौ यगणलघुगुरवश्च ततः स्युस्तत्पृथ्वीच्छन्दः । अष्टभिर्नवभिश्च यतिरित्यर्थः ॥ १३७ ॥

**मन्दाक्रान्ता** ॥ [2]138 ॥ 17. अक्षराणि ॥

मन्दाक्रान्ताम्बुधिरसहयैर्मो भनौ तौ गयुग्मम् ॥ १३८ ॥

**मन्देति** । यत्र मगणभगणनगणास्तगणयुगं गुरुयुगं च स्युस्तन्मन्दाक्रान्ता-च्छन्दः । चतुर्भिः षड्भिः सप्तभिश्च तत्र यतिरित्यर्थः ॥ १३८ ॥

**हारिणी** ॥ 141 ॥ 17. अक्षराणि ॥

वेदर्त्वश्वैर्मभनमयला गश्चेत्तदा हारिणी ॥ १४१ ॥

**वेदेति** । यत्र मगणभगणनगणमगणयगणा लघुगुरू च भवन्ति, चतुर्भिः षड्भिः सप्तभिश्च यतिस्तत् हारिणीच्छन्दः ॥ १४१ ॥

---

1. "यदि कोकिलक" मिति छन्दोमञ्जर्यां पाठः ।

2. अत्र 138 तमात् अनन्तरं 139, 140 संख्ये उल्लंघ्य 141 तमसंख्याकं वृत्त-मुक्तम् । एतद्ग्रन्थोक्तच्छन्दस्संख्यानिर्वाहाय त्यक्तयोः पूरणाय चात्रानुक्तयोः, इतरत्र छन्दस्सूत्र-छन्दोविचिति छन्दोमञ्जरीवृत्तरत्नाकरादिषूक्तस्य हरिणीवृत्तस्य नसमरसलगयुक्तस्य 139 तमत्वेन, पूर्वोक्तेषु सर्वेष्वनुक्तस्य छन्दोमञ्जरीमात्रोक्तस्य भाराक्रान्तावृत्तस्य च मभनरसलगयुतस्य 140 तमत्वेन च योजनं समीचीनमिति भाति ॥

**समदविलासिनी** ॥ 142 ॥ 17. अक्षराणि ॥

समदविलासिनी नजभजैर्भ्लैर्गैरिनशरैः ॥ १४२ ॥

**समदेति** । [यत्र]नगणजगणभगणजगणा भगणलघुगुरवश्च भवन्ति, द्वादशभिः पञ्चभिश्च यतिस्तत्समदविलासिनीच्छन्दः ॥ १४२ ॥

**द्रुता** ॥ 143 ॥ 17. अक्षराणि ॥

ससजा भजगा गुरुर्द्रुता भुवि दशाश्वभिन्ना ॥ १४३ ॥

**ससेति** । यत्र सगणद्वयं जगणभगणजगणा गुरू चैते भवन्ति, तत् द्रुताच्छन्दः । दशभिः सप्तभिश्च तत्र यतिः ॥ १४३ ॥

**कुसुमितलतावेल्लिता** ॥ 144 ॥ 18. अक्षराणि ॥

अथाष्टादशाक्षरा धृतिर्यथा—

स्याद्भूतर्त्वश्वैः कुसुमितलतावेल्लिता म्तौ नयौ यौ ॥ १४४ ॥

**अष्टादशाक्षरेति । स्याद्भूतेति** । यत्र मगणतगणनगणा यगणत्रयं च स्युस्तत् कुसुमितलतावेल्लिताच्छन्दः । पञ्चभिः षड्भिः सप्तभिश्च यत्र विच्छेदः स्यादित्यर्थः ॥ १४४ ॥

**नन्दनम्** ॥ 145 ॥ 18. अक्षराणि ॥

नजभजरास्तु रेफसहिताः शिवैर्हयैर्नन्दनम् ॥ १४५ ॥

**नजभेति** । नगणजगणभगणा जगणो रगणद्वयं च यदि भवन्ति, एकादशभिस्सप्तभिश्च यतिस्तदा नन्दनं छन्दः ॥ १४५ ॥

**नाराचम्** ॥ 146 ॥ 18. अक्षराणि ॥

इह ननरचतुष्कसृष्टं तु नाराचमाचक्षते ॥ १४६ ॥

**इह नेति** । नगणयुगलेन रगणचतुष्केन च नाराचच्छन्दः ॥ १४६ ॥

**[नागच]लता** ॥ 147 ॥ 18. अक्षराणि ॥

दशवसुविरतिर्ननौ रैश्चतुर्भिर्युतौ चेल्लता ॥ १४७ ॥

**दशेति** । [यदि नगणद्वयं रगणचतुष्टयं] दशभिरष्टभिश्च यतिः क (ल्पते) [ल्प्यते तदा] नाराचलताच्छन्दः ॥ १४७ ॥

**[नाराच]तारका** ॥ 148 ॥ 18. अक्षराणि ॥

त्र्यधिकदशयतिर्ननौ रौ भवेतां ररौ तारका ॥ १४८ ॥

**त्र्यधिकेति** । [यत्र नगणौ द्वौ रगणाश्चत्वारस्सन्ति,] त्रयोदशभिर्यतिः कल्पते [तत्] नाराचतारकाच्छन्द इत्यर्थः ॥ १४८ ॥

**शार्दूलललिता** ॥ 149 ॥ 18. अक्षराणि ॥

मः सो जः सतसा दिनेशऋतुभिः शार्दूलललिता ॥ १४९ ॥

**मः सो ज इति** । मगणसगणजगणाः सगणतगणसगणाश्च यत्र भवन्ति, द्वादशभिः षड्भिश्च यत्र विश्रामस्तत् शार्दूलललिताच्छन्दः ॥ १४९ ॥

**चित्रलेखा** ॥ 150 ॥ 18. अक्षराणि ॥

म्भौ न्यौ यौ चेद्युग[हय]मुनिभिः स्यात्तदा चित्रलेखा ॥ १५० ॥

**म्भौ न्याविति** । यत्र मगणभगणनगणा यगणत्रयं च भवन्ति, चतुर्भिः सप्तभिः सप्तभिश्च यतिस्तच्चित्रलेखाच्छन्दः ॥ १५० ॥

**हरकून्तनम्** ॥ 151 ॥ 18. अक्षराणि ॥

सौं जयौ भरसंयुतावृतुबाणाश्वैर्हरकून्तनम् ॥ १५१ ॥

**सौं जेति** । यत्र रगणसगणौ जगणयगणौ भगणरगणौ च स्यातां, षड्भिः पञ्चभिः सप्तभिश्च यतिस्तत् हरकून्तनच्छन्दः ॥ १५१ ॥

**मेघविस्फूर्जिता** ॥ 152 ॥ 19. अक्षराणि ॥

ऊनविंशत्यक्षरातिधृतिर्यथा—

रसर्त्वश्वैर्म्यौ न्सौ ररगु(स)[रु]युतौ मेघविस्फूर्जिता स्यात् ॥ १५२ ॥

**ऊनविंशत्यक्षरेति । रसर्त्वश्वैरिति ।** यगणमगणौ नगणसगणौ रगणद्वयं गुरुश्चैते यत्र स्युः, षड्भिः षड्भिः सप्तभिश्च यतिस्तन्मेघविस्फूर्जिताच्छन्दः ॥ १५२ ॥

**छाया ॥ 153 ॥ 19 अक्षराणि ॥**

भवेत्सैव च्छाया तयुगगयुता स्याद्द्वादशान्ते यदा ॥ १५३ ॥

**भवेदिति ।** यत्र यगणमगणौ नगणसगणौ तगणद्वयं गुरुश्चैते स्युस्तच्छाया-च्छन्दः, [द्वादशेऽक्षरेऽन्ते च यतिरित्यर्थः] ॥ १५३ ॥

**शार्दूलविक्रीडितम् ॥ 154 ॥ 19 अक्षराणि ॥**

सूर्याश्वैर्यदि मस्सजौ सततगाः शार्दूलविक्रीडितम् ॥ १५४ ॥

**सूर्येति ।** यत्र मगणसगणौ जगणसगणौ तगणद्वयं गुरुश्चैते स्युर्द्वादशभि-स्सप्तभिश्च यतिस्तच्छार्दूलविक्रीडितच्छन्दः ॥ १५४ ॥

**सुरसा ॥ 155 ॥ 19 अक्षराणि ॥**

म्रौ भ्नौ यो नो गुरुश्चेत्स्वरमुनिकरणैराह सुरसाम् ॥ १५५ ॥

**म्रौ भ्नाविति ।** यत्र मगणरगणौ भगणनगणौ यगणनगणगुरवश्चैते भवन्ति, सप्तभिः सप्तभिः पञ्चभिश्च यतिस्तत्सुरसाच्छन्दः ॥ १५५ ॥

**फुल्लदाम ॥ 156 ॥ 19 अक्षराणि ॥**

मो गौ नौ तौ गौ शरहयतुरगैः फुल्लदाम प्रसिद्धम् ॥ १५६ ॥

**मो गाविति ।** मगणो गुरुद्वयं नगणद्वयं तगणद्वयं पुनर्गुरुद्वयं च यत्र स्यात्पञ्चभिस्सप्तभिस्सप्तभिश्च यतिस्तत्फुल्लदामच्छन्दः ॥ १५६ ॥

**वल्लकी ॥ 157 ॥ 19 अक्षराणि ॥**

र्भौ जतौ तस्तगुरुकौ यदा दिग्ग्रहच्छेदभाग्वल्लकी ॥ १५७ ॥

**र्भौ जेति ।** रगणभगणजगणास्तगणत्रयं गुरुश्च यत्र भवन्ति, दशभिर्नव-भिश्च यतिस्तद्वल्लकीच्छन्दः ॥ १५७ ॥

**सुवदना** ॥ 158 ॥ 20 अक्षराणि ॥

विंशत्यक्षरा कृतिर्यथा—

ज्ञेया सप्ताश्वषड्भिर्मरभनयभला गश्चेत्सुवदना ॥ १५८ ॥

**विंशत्यक्षरेति । ज्ञेयेति ।** यत्र मगणरगणभगणनगणयगणभगणा लघुगुरू च भवन्ति, तत्सुवदनाच्छन्दः । सप्तभिः सप्तभिः षड्भिश्च तत्र यतिरित्यर्थः ॥ १५८ ॥

**गीतिका** ॥ 159 ॥ 20 अक्षराणि ॥

सजजा भरौ सलगा यदा गदिता तदा किल गीतिका ॥ १५९ ॥

**सजजा इति ।** सगणो जगणद्वयं भगणरगणौ सगणलघुगुरवश्चैते यत्र भवन्ति, तद्गीतिकाच्छन्दः ॥ १५९ ॥

**वृत्तम्** ॥ 160 ॥ 20 अक्षराणि ॥

[त्री रजौ गलौ भवेदिहेदृशेन लक्षणेन वृत्तनाम[1]] ॥ १६० ॥

**त्रीरजाविति ।** यत्र रगणजगणौ त्रिरुक्तौ गुरुलघू च स्यातां, तद्वृत्तच्छन्दः ॥ १६० ॥

**शोभा** ॥ 161 ॥ 20 अक्षराणि ॥

रसाश्वाश्वैः शोभा यमननततगा गश्च विद्भिर्निरुक्ता ॥ १६१ ॥

**रसाश्वेति ।** यत्र यगणमगणौ नगणद्वयं तगणद्वयं गुरुद्वयं चैते भवन्ति, षड्भिः सप्तभिः सप्तभिश्च यतिः स्यात्तत् शोभाच्छन्दः ॥ १६१ ॥

**स्रग्धरा** ॥ 162 ॥ 21 अक्षराणि ॥

एकविंशत्यक्षरा प्रकृतिर्यथा—

म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ॥ १६२ ॥

---

1. अत्र लक्षणवाक्यं न लिखितम् । विच्छिन्नमिव । भाष्यमनुसृत्य वृत्तरत्नाकरप्रकाशितं लक्षणवाक्यमिह लिखितम् ॥

**म्रभ्नैरिति ।** मगणरगणभगणनगणैस्त्रिभिर्यगणैश्च स्रग्धराच्छन्दः । तत्र सप्तकत्रयेण यतिस्स्यात् ॥ १६२ ॥

**सरसी** ॥ 163 ॥ 21 अक्षराणि ॥

नजभजजा जरौ यदि तदा गदिता सरसी कवीश्वरैः ॥ १६३ ॥

सिद्धिरिति सिन्धुकमिति च क्वचित् ।

**नजभजेति ।** नगणजगणभगणास्त्रयो जगणा रगणश्च यत्र स्युस्तत्सरसीच्छन्दः ॥ १६३ ॥

**हंसी** ॥ 164 ॥ 22 अक्षराणि ॥

द्वाविंशत्यक्षराऽऽकृतिर्यथा—

मौ गौ नाश्चत्वारो गौ वसुभुवनयतिरिह भवति हंसी ॥ १६४ ॥

**द्वाविंशत्यक्षरेति । मौ गाविति ।** यत्र मगणद्वयं गुरुद्वयं नगणचतुष्टयं पुनर्गुरुद्वयं च स्यात्, अष्टभिश्चतुर्दशभिश्च यतिस्तत् हंसीच्छन्दः ॥ १६४ ॥

**भद्रकम्** ॥ 165 ॥ 22 अक्षराणि ॥

भ्रनरना रनावथ गुरुर्दिगर्कविरमं हि भद्रकमिदम् ॥ १६५ ॥

**भ्रनेति ।** यत्र नगणस्ततो रगणनगणौ त्रिःपठितौ गुरुश्चैकस्तद्भद्रकं छन्दः । दशभिर्द्वादशभिश्च तत्र यतिरित्यर्थः ॥ १६५ ॥

**मदिरा** ॥ 166 ॥ 22 अक्षराणि ॥

सप्तभकारयुगेकगुरुर्गदितेयमुदारतरा मदिरा ॥ १६६ ॥

**सप्तभेति ।** सप्तभिर्भगणैर्गुरुणा च मदिराच्छन्दः ॥ १६६ ॥

**महास्रग्धरा** ॥ 167 ॥ 22 अक्षराणि ॥

सजताः ससौ ररौ गः फणितुरङ्गहयैः स्यान्महास्रग्धराख्या ॥१६७॥

**सजता इति ।** सगणजगणतगणैः सगणद्वयेन रगणद्वयेन गुरुणा च महास्रग्धराच्छन्दः । अष्टभिः सप्तभिः सप्तभिश्च तत्र यतिरित्यर्थः ॥ १६७ ॥

**लालित्यम्** ॥ 168 ॥ 22 अक्षराणि ॥

लालित्यं भुजगेन्द्रेण भाषितमेतच्च मसरस्भजनगवः ॥ १६८ ॥

**लालित्यमिति ।** मगणसगणरगणसगणा भगणजगणनगणगुरवश्च यदि भवन्ति, तर्हि लालित्यच्छन्दः ॥ १६८ ॥

**अद्रितनया** ॥ 169 ॥ 23 अक्षराणि ॥

त्रयोविंशत्यक्षरा विकृतिर्यथा—

नजभजभा जभौ लघुगुरू बुधैर्निगदितेयमद्रितनया ॥ १६९ ॥

**त्रयोविंशत्यक्षरेति । नजेति ।** यत्र नगणजगणभगणा जगणभगणौ जगणभगणलघुगुरवश्च भवन्ति, तदद्रितनयाच्छन्दः ॥ १६९ ॥

[1]**अश्वललितम्** ॥ 170 ॥ 23 अक्षराणि ॥

यदिह नजौ भजौ भ्जभलगास्तदश्वललितं हरार्कयतियुक् ॥ १७० ॥

**यदिहेति ।** नगणजगणभगणा जगणभगणौ जगणभगणलघुगुरवश्च यत्र स्युस्तदश्वललितच्छन्दः । एकादशभिर्द्वादशभिश्च यतिरित्यर्थः ॥ १७० ॥

**मत्ताक्रीडा** ॥ 171 ॥ 23 अक्षराणि ॥

मत्ताक्रीडा मौ त्नौ नौ न्लौ गिति
भवति वसुशरदशयतियुतम् ॥ १७१ ॥

**मत्तेति ।** यत्र मगणद्वयं तगणो नगणचतुष्टयं लघुर्गुरुश्च भवति, तन्मत्ताक्रीडाच्छन्दः । अष्टभिः पञ्चभिः दशभिश्च यत्र यतिरित्यर्थः ॥ १७१ ॥

---

1. अद्रितनयैव एकादशभिर्द्वादशभिर्यतिश्चेत् अश्वललितम् । यतेरभावे त्वद्रितनयेति भाति ।

**तन्वी** ॥ 172 ॥ 24 अक्षराणि ॥

चतुर्विंशत्यक्षरा संस्कृतिर्यथा—

भूतमुनीनैर्यतिरिह भतनाः स्भौ
भनयाश्च यदि भवति तन्वी ॥ १७२ ॥

**चतुर्विंशत्यक्षरेति । भूतमुनीति ।** यत्र भगणतगणनगणाः सगणो भगणद्वयं नगणयगणौ चैते भवन्ति, पञ्चभिस्सप्तभिर्द्वादशभिश्च यतिः स्यात्, तत् तन्वीच्छन्दः ॥ १७२ ॥

**क्रौञ्चपदा** ॥ 173 ॥ 25 अक्षराणि ॥

पञ्चविंशत्यक्षराभिकृतिर्यथा—

क्रौञ्चपदा भ्मौ स्भौ ननना न्गा-
विषुशरवसुमुनिविरतिरिह भवेत् ॥ १७३ ॥

